**Series ONS** | **SET-4**

कोड नं.
Code No. **49**

रोल नं.
Roll No. | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् ( ऐच्छिकम् )
# SANSKRIT (Elective)

*समयो : होरात्रयम्* | *पूर्णाङ्काः : 100*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 100*

*Time allowed : 3 hours* | *Maximum Marks : 100*

*निर्देशाः :* *संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि।*

*निर्देश :* *जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें।*

***Instructions :*** *Answer all questions in Sanskrit, unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे* ***चत्वारः*** *खण्डाः सन्ति।*

*इस प्रश्न-पत्र में* ***चार*** *खण्ड हैं।*

*There are* ***four*** *sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश - अवबोधनम् (अपठितांश - अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश - अवबोधनम् संस्कृतसाहित्यस्य परिचयः च (पठितांश - अवबोधन एवं संस्कृत साहित्य परिचय) | 40+10=50 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | 20 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

## खण्डः - क (SECTION - A)

### अपठितांश - अवबोधनम्

### अपठितांश - अवबोधन

### Unseen Reading Comprehension 15 अङ्काः

1. अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेनोत्तरत :

निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following **two** passages and answer the given questions in Sanskrit :

(क) **प्रथमः अनुच्छेदः**

संसारे सर्वे जनाः सन्तोषेण एव सुखं लब्धुं शक्नुवन्ति। सन्तोषस्य अभावे तु दुःखम् एव लभ्यते। कर्म कृत्वा यावद् धनम् अर्जितं भवति तेन एव सर्वाणि कार्याणि यदि करोति जनः तर्हि तस्य जीवनं सुखितं भवति। परमद्यत्वे जना अधमर्णतां प्राप्य अपि सुखसाधनानि लभन्ते। अत एव कोऽपि जनः सुखी न दृश्यते। अतः जनैः सदा सन्तुष्टैः भाव्यम्।

**प्रश्नाः**

(अ) एकपदेनोत्तरत। **½x2=1**

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) जनाः केन सुखं लभन्ते ?

(ii) सन्तुष्टैः कैः भाव्यम् ?

(ब) पूर्णवाक्येनोत्तरत। **2**

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

अद्यत्वे जना: सुखसाधनानि कथं लभन्ते?

(स) यथानिर्देशम् उत्तरत। **½x4=2**

यथानिर्देश उत्तर दीजिए।

Answer as directed.

(i) 'शक्नुवन्ति' अस्या: क्रियाया: कर्तृपदं किम्?

(ii) 'दु:खी' अस्य विलोमपदं किम्?

(iii) 'कार्याणि' अस्य विशेषणं किम्?

(iv) 'तस्य जीवनम्' अत्र तस्य इति कस्मै प्रयुक्तम्?

(ख) **द्वितीय: अनुच्छेद:**

भगवता श्रीकृष्णेन उक्तम् - ''अहमेव जगत: मूलं कारणमस्मि, मयैव च संसार: प्रवृत्तो भवति। माम् एवं मत्वा मय्येव श्रद्धां प्रेम च निरूप्य धीमन्त: भक्ता: मां भजन्ते। मयि धृतचित्ता: मयि अर्पितप्राणा: भक्ता: परस्परं मम गुणान् प्रभावं च जानन्त:, तान् कथयन्त: नित्यं सन्तुष्टा: भवन्ति, मयि च स्निह्यन्ति।' इदमेव च पुन: संक्षेपेण वदन् भगवान् पुन: स्पष्टं करोति ''ये नित्यं मयि सततमनस: सप्रेम मां भजन्ते तेभ्य: भक्तेभ्य: अहं बुद्धियोगं प्रयच्छामि।''

**प्रश्ना:**

(अ) एकपदेनोत्तरत। **1x2=2**

एक पद में उत्तर दीजिए।

Answer in one word.

(i) 'सततम्' अस्य क: पर्याय:?

(ii) 'तान् कथयन्त:' अत्र 'तान्' इति सर्वनामपदं केभ्य: प्रयुक्तम्?

(ब) पूर्णवाक्येनोत्तरत। **2**

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

के नित्यं सन्तुष्टाः भवन्ति?

(स) यथानिर्देशमुत्तरत। **1x4=4**

यथानिर्देश उत्तर दीजिए।

Answer as directed.

(i) 'अस्मि' इति क्रियायाः कर्तृपदं किम्?

(ii) 'कारणम्' अस्य विशेषणं किम्?

(iii) 'अज्ञाः' अस्य विलोमपदं किम्?

(iv) 'मयि स्निह्यन्ति' अत्र 'मयि' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। **2**

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।

Write a suitable title for this passage in Sanskrit.

## खण्डः - ख (SECTION - B)

### संस्कृतेन रचनात्मकलेखनम्

### संस्कृत में रचनात्मक लेखन

### Writing Skills in Sanskrit  15 अङ्काः

2. मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुनः लिखत : **1x10=10**

मञ्जूषा से उचित संकेत लेकर निम्नलिखित कथा को पूर्णकर पुनः लिखिए :

Complete and rewrite the following story, with the help of the words given in the box below :

**कथा**

दक्षिणभारते एको महात्मा अजायत–महर्षिरमणः। स नित्यं प्रातः त्रिवादने वनं गच्छति स्म। एकदा कश्चित् तम् अपृच्छत् - "भवान्, अतिप्रातः वनं कथं गच्छति!" महर्षिः उदतरत् - 'अहं सीतारामयोः ___(i)___ गच्छामि। एषा ___(ii)___ समाचारपत्रे प्रकाशिता ___(iii)___ । इमां ___(iv)___ पठित्वा एकः ___(v)___ तम् ___(vi)___ अपृच्छत् च "किम् इदं ___(vii)___ यदा भवान् वनं ___(viii)___ तदा सीतारामौ ___(ix)___ ।" महर्षिरमणः अवदत् - "सत्यम्।" ख्रिष्टपूजकः प्रष्टुम् ___(x)___ किं सोऽपि तयोः दर्शनं कर्तुं शक्नोति।

**मञ्जूषा**

| |
|---|
| सञ्जाता, वार्ताम्, ख्रिष्टपूजकः, दर्शनार्थम्, वार्त्ता, सत्यम्, गच्छति, उपागच्छत्, पश्यति, ऐच्छत्। |

3. मञ्जूषातः पदानि चित्वा 'लेखनी' इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत। **1x5=5**

मञ्जूषा से पद लेकर 'लेखनी' इस विषय पर **पाँच** वाक्य संस्कृत में लिखिए।

Write **five** sentences in Sanskrit describing 'Pen' with the help of the words given in the box below.

**मञ्जूषा**

| |
|---|
| लेखन्या, वाल्मीकिः, कालिदासः, अलिखत्, विदुषः, शस्त्रम्, एषा, पूर्वम्, श्यामा, अधुना, नीला, दृश्यते, रक्ता, स्वच्छलेखनम्, काष्ठफलके, लिखति, अक्षराणि। |

## खण्डः - ग (SECTION - C)

### पठितांश-अवबोधनम् संस्कृतसाहित्यस्य परिचयः च

### पठितांश-अवबोधन एवं संस्कृत साहित्य परिचय

### Reading Comprehension and Introduction to History of Sanskrit Literature

**40+10=50 अङ्काः**

4. अधोलिखितं पद्यं, गद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेनोत्तरत :

निम्नलिखित पद्य, गद्यांश एवं नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following verse, prose, poetry and drama passages and answer the given questions in Sanskrit :

(क) <u>पद्यम्</u>

''पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्,
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्,
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः।''

**प्रश्नाः**

(अ) एकपदेनोत्तरत। **½x2=1**

एक पद में उत्तर दीजिए।

Answer in one word.

(i) दीर्घग्रीवः कः भवति ?

(ii) अश्वः कानि अत्ति ?

(ब) पूर्णवाक्येनोत्तरत। **2**

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

अश्वः कान् प्रकिरति ?

(स) यथानिर्देशमुत्तरत। **1x2=2**

यथानिर्देश उत्तर दीजिए।

Answer as directed.

(i) 'सततम्' अस्य कः पर्यायः ?

(ii) 'अग्रे' अस्य विलोमपदं किम् ?

(ख) **गद्यांशः**

''इत्येवं विचार्य सर्वस्वदक्षिणं यज्ञं कर्तुमुपक्रान्तवान्। ततः शिल्पिभिरतीव मनोहरो मण्डपः कारितः। सर्वापि यज्ञसामग्री समाहृता। देवमुनिगन्धर्वयक्षसिद्धाश्च समाहूताः। तस्मिन्नवसरे समुद्राह्वानार्थं कश्चिद् ब्राह्मणः समुद्रतीरे प्रेषितः। सोऽपि समुद्रतीरं गत्वा गन्धपुष्पादिषोडशोपचारं विधायाऽब्रवीत्।''

**प्रश्नाः**

(अ) एकपदेनोत्तरत। **½x2=1**

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) शिल्पिभिः कः कारितः ?

(ii) कस्य आह्वानार्थं ब्राह्मणः प्रेषितः ?

(ब) पूर्णवाक्येनोत्तरत। **2**

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

यज्ञे के समाहूताः ?

(स) यथानिर्देशमुत्तरत। **1x2=2**

यथानिर्देश उत्तर दीजिए।

Answer as directed.

(i) 'कारुभि:' अस्य क: पर्याय:?

(ii) 'आगत्य' अस्य विलोमपदं किम्?

(ग) **नाट्यांश:**

''जनक: - (चिरं निर्वर्ण्य) भो: किमप्येतत्। मनो मे संमोहस्थिरमपि हरत्येष बलवान् अयोधातुं यद्वत्परिलघुरयस्कान्तशकल:।

लव: - (प्रविश्य स्वगतम्) अविज्ञातवय: क्रमौचित्यान् पूज्यानपि सत: कथमभिवादयिष्ये? (विचिन्त्य) अयं पुरविरुद्धप्रकार इति वृद्धेभ्य: श्रूयते (सविनयम् उपसृत्य) एष वो लवस्य शिरसा प्रणामपर्याय:।

अरुन्धतीजनकौ - कल्याणिन्! आयुष्मान् भूया:।

कौसल्या - जात! चिरं जीव।''

**प्रश्ना:**

(अ) एकपदेनोत्तरत। **½x2=1**

एक पद में उत्तर दीजिए।

Answer in one word.

(i) 'क्रम:' अस्य क: पर्याय:?

(ii) 'प्रकाशम्' अस्य विलोमपदं किम्?

(ब) पूर्णवाक्येनोत्तरत। **2**

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

लव: स्वगतं किं चिन्तयति?

(स) यथानिर्देशमुत्तरत। **1x2=2**

यथानिर्देश उत्तर दीजिए।

Answer as directed.

(i) 'स्निह्यान्' अस्य विलोमपदं किम्?

(ii) 'व:' इति सर्वनामपदं केभ्य: प्रयुक्तम्?

**5.** शब्दार्थान् मेलयित्वा लिखत। **½x4=2**

शब्दों का अर्थों से मिलान कर लिखिए।

Match the words with their meanings and rewrite the same.

| **शब्दाः** | **अर्थाः** |
|---|---|
| (अ) कुर्वन् | (i) प्राप्नोति |
| (ब) अधिगच्छति | (ii) जलानाम् |
| (स) अम्भसाम् | (iii) लभते |
| (द) अश्नुते | (iv) आचरन् |

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत : **1x4=4**

रेखांकित पदों के आधार पर प्रश्ननिर्माण कीजिए :

Frame questions on the basis of the underlined words :

(i) <u>त्याग</u> एव हि रक्षणम्।

(ii) कुर्वन्नेवेह <u>कर्माणि</u>।

(iii) न च <u>संन्यसनादेव</u>।

(iv) परिपूर्णेषु <u>नीडेषु</u> प्रतिनिवर्तन्ते।

7. अधोलिखित**भावार्थयोः** रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत : **½x12=6**

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्तस्थानों की पूर्ति कीजिए :

Fill in the blanks in the following **two** explanations with the help of the words given in the box :

(अ) 'हरति अतिमलिनपि दोषजातं गुरूपदेशः।'

**भावार्थः**

यथा ___(i)___ प्रकाशः ___(ii)___ आगतम् ___(iii)___ दूरीकरोति, तथैव ___(iv)___ दोषैः ___(v)___ अज्ञानं ___(vi)___ दूरीकरोति।

(ब) 'अकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत्।'

**भावार्थः**

यदा शिववीरः स्वोद्देश्यपूर्त्यै गच्छति तदा ___(i)___ यथा ___(ii)___ पर्वतानां ___(iii)___ उद्भवति ___(iv)___ च प्रकटयति ___(v)___ सर्वत्र ___(vi)___ सञ्जातः।

**मञ्जूषा**

| |
|---|
| घनान्धकारः, अकस्मात्, सूर्यस्य, अन्धकारम्, दूरीकरोति, राजसु, उत्पन्नम्, शिखरिषु, मेघपङ्क्तिः, अन्धकारः, रात्र्याम्, तथैव। |

8. अधोलिखितयोः **श्लोकयोः** अन्वययोः रिक्तस्थानपूर्तिं कुरुत : **½x6=3**

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्तस्थान की पूर्ति कीजिए :

Fill in the blanks in the following prose - order renderings of the **two** verses :

(अ) गिरौ कलापी गगने पयोदो लक्षान्तरेऽर्कश्च जले च पद्मम्।
इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्यो यस्य मित्रं न हितस्य दूरम्।

**अन्वयः**

___(i)___ गिरौ गगने पयोदः ___(ii)___ च लक्षान्तरे जले पद्मं च। ___(iii)___ इन्दुः कुमुदस्य बन्धुः, यः यस्य मित्रं तस्य दूरं न हि।

(ब) न किञ्चिदपि कुर्वाण: सौख्यैर्दु:खान्यपोहति।

तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जन:।।

**अन्वय:**

किञ्चित् अपि न ____(i)____ दु:खानि सौख्यै: ____(ii)____ य: हि यस्य प्रिय: जन: तत् तस्य ____(iii)____ द्रव्यम्।

**9.** यथानिर्देशम् उत्तरत।

यथानिर्देश उत्तर दीजिए।

Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत। **½x4=2**

कर्ता एवं क्रियापद चुनिए।

Select the subject and the verb.

(i) विद्वान् द्वयम् अपेक्षते।

(ii) चेत् त्वम् एव तनुषे।

(ब) विशेषणपदं चिनुत। **1x2=2**

विशेषणपद चुनिए।

Select the adjective.

(i) प्रयत्नवन्तं पुरुषं लक्ष्मी: खलीकरोति।

(ii) निर्मलापि कालुष्यमुपयाति बुद्धि:।

(स) अधोलिखितपङ्क्त्यो: रेखांङ्कितसर्वनामपदे काभ्यां प्रयुक्ते? **1x2=2**

निम्नलिखित पंक्तियों में रेखांकित सर्वनाम पद किस के लिए प्रयुक्त हैं?

In the following lines for whom the underlines pronouns are used ?

(i) <u>अस्मिन्</u> महामोहकारिणि यौवने।

(ii) <u>अनया</u> दैववशेन परिगृहीता राजान:।

(द) अधोलिखितपङ्क्तिभ्यां 'पुत्रवधू' तथा 'भयावहः', इति पदयोः समानार्थके पदे चित्वा लिखत : **1x2=2**

निम्नलिखित पंक्तियों में से 'पुत्रवधू' तथा 'भयावह' इन पदों के समानार्थक पद चुन कर लिखिए :

Select and write the synonyms of daughter-in-law and horrible from the following lines :

(i) अपरिणामोपशमो दारुणो लक्ष्मीमदः।

(ii) स्नुषां च पृष्ट्वा ग्रहीष्यामि।

(य) कः कं कथयति? **½x4=2**

कौन किसे कह रहा है?

Who is saying to whom ?

(i) बुद्धिमता राज्यं न प्रार्थनीयम्।

(ii) यद्रत्नं षड् रसान् सूते तद् गृह्यताम्।

**10.** (अ) अधोलिखितलेखकानां कस्यापि **एकस्याः** रचनायाः नाम लिखत : **1x5=5**

निम्नलिखित लेखकों की किसी **एक** रचना का नाम लिखिए :

Write the name of any **one** work of each of the following poets :

भवभूतिः, पण्डितराजजगन्नाथः, व्यासः, मथुरानाथशास्त्री, माघः।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत : **1x5=5**

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :

Write the names of the authors of the following works :

पाषाणीकन्या, नीतिशतकम्, कुमारसंभवम्, किरातार्जुनीयम्, समुद्रसङ्गमः।

## खण्ड - घ (SECTION - D)

## छन्दोऽलङ्काराः

## छन्द एवम् अलङ्कार

**Metres and Figures of Speech** **10+10=20 अङ्काः**

**11.** (अ) प्रश्नान् उत्तरत। **1x2=2**

प्रश्नों के उत्तर दीजिए।

Answer the questions.

(i) मातारः अत्र को गणः ?

(ii) 'ह्रासः' अत्र 'सः' इति लघुः गुरुः वा ?

(ब) अधोलिखितपरिभाषाः पूरयत : **1x4=4**

निम्नलिखित परिभाषाओं को पूर्ण कीजिए :

Complete the following definitions :

(i) उपेन्द्रवज्रा जतजा __________।

(ii) श्लोके षष्ठं गुरु __________

__________ सप्तमं दीर्घमन्ययोः।।

(iii) जतौ तु वंशस्थ __________।

(iv) सूर्याश्वै __________ सततगाः __________।

(स) अधोलिखितपङ्क्त्योः किं किं छन्दः ? **1x2=2**

निम्नलिखित पंक्तियों में कौन-कौन सा छन्द है ?

What is the metre in the following lines ?

(i) पापान्निवारयति योजयते हिताय।

(ii) उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।

(द) **एकस्य** छन्दसः उदाहरणं लिखत : **2**

**एक** छन्द का उदाहरण लिखिए :

Write the example of any **one** of the following metres :

मालिनी, इन्द्रवज्रा।

**12.** (अ) कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत : **3**

किसी **एक** शब्दालंकार का सोदाहरण लक्षण लिखिए :

Write an example and definition of any **one** figures of speech :

अनुप्रासः, यमकम्।

(ब) केवल**मेकस्य** अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत : **3**

केवल **एक** अर्थालङ्कार का लक्षण एवं उदाहरण लिखिए :

Define and illustrate any **one** of the figures of speech.

रूपकम्, उत्प्रेक्षा।

(स) अधोदत्तपङ्क्त्योः अलङ्कारं निर्दिशत : **1x2=2**

निम्नलिखित पंक्तियों में अलङ्कार निर्देश कीजिए :

Indicate the figures of speech in the following lines :

(i) वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।

(ii) प्रक्षालित इव उद्भासित इव भवनमाजगाम।

(द) अधोदत्तपरिभाषा**द्वयं** पूरयत : **1x2=2**

निम्नलिखित **दोनों** परिभाषाओं को पूर्ण कीजिए :

Complete the following definitions of the **two** figures of speech :

(i) रूपकं रूपितारोपो __________।

(ii) सामान्यं वा विशेषेण __________

____________________

__________।